श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे

# ॥ षट्पञ्चाशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ षट्पञ्चाशः सर्गः ॥

पुनः सीतां समालोक्य हनुमतो लङ्कातो निवर्तनं तेन समुद्रस्य लङ्घनं च

ततस्तु शिंशपामूले जानकीं पर्यवस्थिताम्।
अभिवाद्याब्रवीद् दिष्ट्या पश्यामि त्वामिहाक्षताम्॥ **5.56.1** ॥

ततस्तं प्रस्थितं सीता वीक्षमाणा पुनः पुनः।
भर्तुः स्नेहान्विता वाक्यं हनूमन्तमभाषत॥ **5.56.2** ॥

यदि त्वं मन्यसे तात वसैकाहमिहानघ।
क्वचित् सुसंवृते देशे विश्रान्तः श्वो गमिष्यसि॥ **5.56.3** ॥

मम चैवाल्पभाग्यायाः सान्निध्यात् तव वानर।
शोकस्यास्याप्रमेयस्य मुहूर्तं स्यादपि क्षयः॥ **5.56.4** ॥

गते हि हरिशार्दूल पुनः सम्प्राप्तये त्वयि।
प्राणेष्वपि न विश्वासो मम वानरपुङ्गव॥ **5.56.5** ॥

अदर्शनं च ते वीर भूयो मां दारयिष्यति।
दुःखाद् दुःखतरं प्राप्तं दुर्मनःशोककर्शिताम्॥ **5.56.6** ॥

अयं च वीर सन्देहस्तिष्ठतीव ममाग्रतः।
सुमहत्सु सहायेषु हर्यृक्षेषु महाबलः॥ **5.56.7** ॥

कथं नु खलु दुष्पारं सन्तरिष्यति सागरम्।
तानि हर्यृक्षसैन्यानि तौ वा नरवरात्मजौ॥ **5.56.8** ॥

त्रयाणामेव भूतानां सागरस्यापि लङ्घने।
शक्तिः स्याद् वैनतेयस्य तव वा मारुतस्य वा॥ **5.56.9**॥

तदत्र कार्यनिर्बन्धे समुत्पन्ने दुरासदे।
किं पश्यसि समाधानं त्वं हि कार्यविशारदः॥ **5.56.10**॥

काममस्य त्वमेवैकः कार्यस्य परिसाधने।
पर्याप्तः परवीरघ्न यशस्यस्ते फलोदयः॥ **5.56.11**॥

बलैस्तु सङ्कुलां कृत्वा लङ्कां परबलार्दनः।
मां नयेद् यदि काकुत्स्थस्तत् तस्य सदृशं भवेत्॥ **5.56.12**॥

तद् यथा तस्य विक्रान्तमनुरूपं महात्मनः।
भवत्याहवशूरस्य तथा त्वमुपपादय॥ **5.56.13**॥

तदर्थोपहितं वाक्यं प्रश्रितं हेतुसंहितम्।
निशम्य हनुमान् वीरो वाक्यमुत्तरमब्रवीत्॥ **5.56.14**॥

देवि हर्यृक्षसैन्यानामीश्वरः प्लवतां वरः।
सुग्रीवः सत्त्वसम्पन्नस्तवार्थे कृतनिश्चयः॥ **5.56.15**॥

स वानरसहस्राणां कोटीभिरभिसंवृतः।
क्षिप्रमेष्यति वैदेहि सुग्रीवः प्लवगाधिपः॥ **5.56.16**॥

तौ च वीरौ नरवरौ सहितौ रामलक्ष्मणौ।
आगम्य नगरीं लङ्कां सायकैर्विधमिष्यतः॥ **5.56.17**॥

सगणं राक्षसं हत्वा नचिराद् रघुनन्दनः।
त्वामादाय वरारोहे स्वां पुरीं प्रति यास्यति॥ **5.56.18**॥

समाश्वसिहि भद्रं ते भव त्वं कालकाङ्क्षिणी।
क्षिप्रं द्रक्ष्यसि रामेण निहतं रावणं रणे॥ **5.56.19**॥

निहते राक्षसेन्द्रे च सपुत्रामात्यबान्धवे।
त्वं समेष्यसि रामेण शशाङ्केनेव रोहिणी ॥ **5.56.20** ॥

क्षिप्रमेष्यति काकुत्स्थो हर्यृक्षप्रवरैर्युतः।
यस्ते युधि विजित्यारीन् शोकं व्यपनयिष्यति ॥ **5.56.21** ॥

एवमाश्वास्य वैदेहीं हनूमान् मारुतात्मजः।
गमनाय मतिं कृत्वा वैदेहीमभ्यवादयत् ॥ **5.56.22** ॥

राक्षसान् प्रवरान् हत्वा नाम विश्राव्य चात्मनः।
समाश्वास्य च वैदेहीं दर्शयित्वा परं बलम् ॥ **5.56.23** ॥

नगरीमाकुलां कृत्वा वञ्चयित्वा च रावणम्।
दर्शयित्वा बलं घोरं वैदेहीमभिवाद्य च ॥ **5.56.24** ॥

प्रतिगन्तुं मनश्चक्रे पुनर्मध्येन सागरम्।
ततः स कपिशार्दूलः स्वामिसन्दर्शनोत्सुकः ॥ **5.56.25** ॥

आरुरोह गिरिश्रेष्ठमरिष्टमरिमर्दनः।
तुङ्गपद्मकजुष्टाभिर्नीलाभिर्वनराजिभिः ॥ **5.56.26** ॥

सोत्तरीयमिवाम्भोदैः शृङ्गान्तरविलम्बिभिः।
बोध्यमानमिव प्रीत्या दिवाकरकरैः शुभैः ॥ **5.56.27** ॥

उन्मिषन्तमिवोद्धूतैर्लोचनैरिव धातुभिः।
तोयौघनिःस्वनैर्मन्द्रैः प्राधीतमिव पर्वतम् ॥ **5.56.28** ॥

प्रगीतमिव विस्पष्टं नानाप्रस्रवणस्वनैः।
देवदारुभिरुद्धूतैरूर्ध्वबाहुमिव स्थितम् ॥ **5.56.29** ॥

प्रपातजलनिर्घोषैः प्राक्रुष्टमिव सर्वतः।
वेपमानमिव श्यामैः कम्पमानैः शरद्घनैः ॥ **5.56.30** ॥

वेणुभिर्मारुतोद्धूतैः कूजन्तमिव कीचकैः।
निःश्वसन्तमिवामर्षाद् घोरैराशीविषोत्तमैः ॥ **5.56.31** ॥

नीहारकृतगम्भीरैर्ध्यायन्तमिव गह्वरैः।
मेघपादनिभैः पादैः प्रक्रान्तमिव सर्वतः ॥ **5.56.32** ॥

जृम्भमाणमिवाकाशे शिखरैरभ्रमालिभिः।
कूटैश्च बहुधा कीर्णं शोभितं बहुकन्दरैः ॥ **5.56.33** ॥

सालतालैश्च कर्णैश्च वंशैश्च बहुभिर्वृतम्।
लतावितानैर्विततैः पुष्पवद्भिरलङ्कृतम् ॥ **5.56.34** ॥

नानामृगगणैः कीर्णं धातुनिष्यन्दभूषितम्।
बहुप्रस्रवणोपेतं शिलासञ्चयसङ्कटम् ॥ **5.56.35** ॥

महर्षियक्षगन्धर्वकिन्नरोरगसेवितम्।
लतापादपसम्बाधं सिंहाधिष्ठितकन्दरम् ॥ **5.56.36** ॥

व्याघ्रादिभिः समाकीर्णं स्वादुमूलफलद्रुमम्।
आरुरोहानिलसुतः पर्वतं प्लवगोत्तमः ॥ **5.56.37** ॥

रामदर्शनशीघ्रेण प्रहर्षेणाभिचोदितः।
तेन पादतलाक्रान्ता रम्येषु गिरिसानुषु ॥ **5.56.38** ॥

सघोषाः समशीर्यन्त शिलाश्चूर्णीकृतास्ततः।
स तमारुह्य शैलेन्द्रं व्यवर्धत महाकपिः ॥ **5.56.39** ॥

दक्षिणादुत्तरं पारं प्रार्थयन् लवणाम्भसः।
अधिरुह्य ततो वीरः पर्वतं पवनात्मजः ॥ **5.56.40** ॥

ददर्श सागरं भीमं भीमोरगनिषेवितम्।
स मारुत इवाकाशं मारुतस्यात्मसम्भवः ॥ **5.56.41** ॥

प्रपेदे हरिशार्दूलो दक्षिणादुत्तरां दिशम्।
स तदा पीडितस्तेन कपिना पर्वतोत्तमः॥ **5.56.42** ॥

ररास विविधैर्भूतैः प्राविशद् वसुधातलम्।
कम्पमानैश्च शिखरैः पतद्भिरपि च द्रुमैः॥ **5.56.43** ॥

तस्योरुवेगोन्मथिताः पादपाः पुष्पशालिनः।
निपेतुर्भूतले भग्नाः शक्रायुधहता इव॥ **5.56.44** ॥

कन्दरोदरसंस्थानां पीडितानां महौजसाम्।
सिंहानां निनदो भीमो नभो भिन्दन् हि शुश्रुवे॥ **5.56.45** ॥

त्रस्तव्याविद्धवसना व्याकुलीकृतभूषणाः।
विद्याधर्यः समुत्पेतुः सहसा धरणीधरात्॥ **5.56.46** ॥

अतिप्रमाणा बलिनो दीप्तजिह्वा महाविषाः।
निपीडितशिरोग्रीवा व्यवेष्टन्त महाहयः॥ **5.56.47** ॥

किन्नरोरगगन्धर्वयक्षविद्याधरास्तथा।
पीडितं तं नगवरं त्यक्त्वा गगनमास्थिताः॥ **5.56.48** ॥

स च भूमिधरः श्रीमान् बलिना तेन पीडितः।
सवृक्षशिखरोदग्रः प्रविवेश रसातलम्॥ **5.56.49** ॥

दशयोजनविस्तारस्त्रिंशद्योजनमुच्छ्रितः।
धरण्यां समतां यातः स बभूव धराधरः॥ **5.56.50** ॥

स लिलङ्घयिषुर्भीमं सलीलं लवणार्णवम्।
कल्लोलास्फालवेलान्तमुत्पपात नभो हरिः॥ **5.56.51** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे षट्पञ्चाशः सर्गः॥